


## साधारण श्छत्र बन्धः

माहिपानशनादीन नतदास सदातन ।

नदीनशाशान दीन नदीनाशन पाहिमा ॥ 25 ॥

माहिति । मां-लक्ष्मीं, अहिं-आदिशेषं च तत्तदुचित कैंकर्य प्रदानेन पातीति तथोक्तं । अनशन अशनायाद्यतीत, अशनमत्र हेयगुणोपलक्षणं । अदीन-परिपूर्ण । नतदास-आश्रितदास आश्रितानां सारथ्यादि दूतकार्यं अपि करेति इति भावः । सदातन-सर्वकालिक । नदीनश-क्षीराब्धिशायिन् । आशा नदीन नदीनाशन-आशा एव नदीनः-समुद्रः तस्य नदीनाशन-अगस्त्यः । आश्रितानां इच्छा विषयदानेन तदिच्छानाशक इत्यर्थः । एवं भूत भगवन् । मा-मां पाहि-मामपि त्वदीय कैंकर्यं सांराज्यदानेन रक्षतु इत्यर्थः ।



श्रीमदमन्दमनोहरकीर्तिं सारदरस्थिरमीशमशत्रुम् ।

अच्युतमस्तमनोलमीडे सादरपालित सर्वजनौघम् ॥ 26 ॥




श्रीमदिति । श्रीमती अमन्दा- अधिका मनोहरा च कीर्तिः यस्य तं,सारः दरः शंखः यस्य सः सारदरः सचासौ स्थिरश्चेति सारदरस्थिरं । आश्रित रक्षण विषये स्थिरमिति भावः । अस्तं-निरस्तं मनोमलं आश्रितनिष्ठरजस्तमोगुणः येन तं । शिष्टं स्पष्टम् ।

सादरदक्त दमादिगुणन्मे श्रीपतिपद्मपदं वशवर्ति ।

शन्दिशतु प्रचुरं वरयोगीन् मानसवर्ति सकल्मषदूरम् ॥ 27 ॥



सादरेति । वशवर्ति-शरणागति वश्यं । वराञ्च ते योगीशञ्च वरयोगीशः मुनीन्द्रश्रेष्ठतमाः तेषां मानसवर्ति तत् ध्यान विषयमित्यर्थः । सकल्मषदूरं-पापिनां दुर्लभं । सादरेति-स्पष्टं । श्रीपतिपद्मपदं-श्रियः पतेः पद्मतुल्यपदं मे-मह्यं प्रचुरं शं-सुखं दिशतु ।

तं रमाक्षदयोवश्री श्रीवयोदक्षमारतम् ।

तं श्रीवक्षसमीडेऽहं यो लोकेशः क्षमारतम् ॥ 28 ॥




तमिति । यो लोकेशः लोकनाथः । तं रमेत्याद्ये पदं - रमाक्षं-अत्राक्षशब्देन कटाक्ष उच्यते । लक्ष्मीकटाक्षः तद्दया च । यद्वा रमायां अक्षं यस्य स रमाक्षः - भगवान् तद्दया-उः-रुद्रः वः-वायुः तयोः श्रीः-एतदुभयोपादानं सर्वदिक्पालोक्षणार्थं सर्वदिक्पालैश्वर्यमित्यर्थः । श्रीः शोभा वयः - आयुः एतानि ददातीति । या क्षमौ-क्षान्तिः तस्यां रतं-प्रीतं क्षमागुणे सति एतत् सर्वं लस्यत इति भावः । क्षमारतं - भूदेव्यां प्रीतं । तं प्रसिद्धं श्रीवक्षसं - श्रियः पतिं ईडे ।

माक्षरक्षक सत्भासा भासते हह् ते सभा ।

भास्तं भन नभस्तंभा साभासत्कक्ष रक्ष मा ॥ 29 ॥




माक्षेति ।। माक्ष-लक्ष्म्याम् एव नेत्रं यस्य तथा भूत । भास्तंभन-भया-दीप्त्या सर्वान् स्तंभयति इति तथा भूत-भगवतो निरतिशय दीप्त्यवलोकने सर्वेपि स्तब्धा भवन्तीति भावः । भासत्कक्ष-विराजमान कक्ष प्रदेशः - कक्षोक्तिः दिव्यमंगल विग्रहोपलक्षणार्था । रक्षक-निरुपाधिक रक्षक-नारायणेति शेषः । नभस्तंभा-नभसि-परमव्योम्नि स्तंभाः सहस्रसंख्यका स्थूणाः यस्यास्सा ते सभा- दिव्यपरिषत् । सत्भासा-दिव्य तेजसा भसते । हह-आश्चर्यं । मा-अकिञ्चनं मां रक्ष । तादृश सभाप्रवेशनेन रक्ष । मुक्तिं दद इति भावः ।

सा रमा पातु तत् भव्यदाऽसमा भवपापहा ।
सा रमापाकृतकृव्यपाऽसदंभकृपापहा ॥ 30 ॥




सारमेति । सारभृता - मा - ज्ञानं यस्याः सा तत् भव्यदा - तथा विधं भव्यं-मंगळं ददातीति तथोक्तं । असम-निस्थुला । भवपापहा-संसृति जन्यस्य - संसृतिजनकस्य च पापस्य नाशिका । अपाकृत कृव्यपाः कृव्यं - आमिषं पान्तीति कृव्यपाः राक्षसाः ते अपाकृताः यया सा । असदंभकृपा निर्व्याजकृपेत्यर्थः । पहा-पः प्रसन्नः, हः-हरिः यस्याः सा पहा । यद्वा पेषु-आर्तेषु हा-वीक्षणं यस्यास्सा-पहा ।

अथवा, पे कौस्तुभे हा वीक्षणं यस्यास्सा इति वा । सा मानाधिकरन्यात् तद्वीक्षणवति इत्यर्थः । मा स्त्री मानेमृतौ मेधा । पस्त्रिष्वार्ते प्रसन्ने च । पः पुमान् पवने शैले प्रकाशे कौस्तु भेक्षणे इति नानार्थ रत्नमालायां । सा-एवं भूता रमा पातु ।

रमारमिन् रक्ष नमामिनाथ क्षमापते कञ्जजमूलनाभ ।

सुनीलमेघाङ्ग पयोजतुल्य करोत्तमोरो जलजक्षमाक्ष ॥ 31 ॥

(मध्य कोष्टेषु श्लोकशेषः पठनियुः)

रमेति । रमया रमत इति रमारमी तस्य संबोधनं-रमारमिन्निति कञ्जजस्य - ब्रह्मणः मूलभूता नाभिः यस्य पयोजतुल्यकर । उत्तमोरो-जलजस्य क्षमे-हिते तुल्य इति अर्थः कुक्षे यस्य ।

मध्य कोष्टेषु (मोरोजलजक्षमाक्ष) श्लोकशेषपठनं बोध्यम् ।



# महारथबन्धः

श्री श्रीवासगुरुं समस्तविहितं यत्रैवसानुष्टिति श्रौती साच विरागतातुल्यशस्तं ज्ञानसिन्धुं परम् ।
औन्नत्यात् गुणतो निराकृतमहामेरुम्मुनिक्ष्मापतिं दुर्गविंष्ठिजितं कृपा जनपरायत्तं भजे तुष्टिदम् ॥ 32 ॥
स्पष्टोर्थः मध्यकोष्ठेषु ''श्रीवास यतीशगुरुर्विजयतु'' इत्युद्धारो द्रष्टव्यः ।






# गज बन्धः

मा पातु मारमाता सा दाशावनवशाशया ।

कुशलापपलाशश्रीः ययालंका कृता पुरा ।। 33 ।।

मा पात्विति । यया पुरा लंका अपपलाशश्रीः- अपगत राक्षसश्रीः कृता सा दासावन वशाशय-भक्तरक्षणैकमनसेत्यर्थः । कुशला-सर्वशक्ता मारमाता मा (रमा, मांच) मातु । कुशलं निपुणे त्रिषु इति नानार्थ माला । लंका येन कृता पुरा इति रेखायां लेखनं प्रामादिकम् इति ज्ञेयं ।



# तुरग बन्धः

वन्दे मन्देतरश्रीकं तं कंसरिपुमापमा ।

मानितं सततं यं वै दीनपं जलजेक्षणं ॥ 34 ॥

वन्देति । यं मा-लक्ष्मीः आप तं वन्दे इत्यन्वयः । त विशेषण पदानि स्पष्टार्थानि । मन्देतर श्रीकं कंसरिपुं दीनपं (दीनरक्षकं) सततं मानितं जलजेक्षणं यं मा आप तं वन्दे ।

